# shrI lakShmIsUkta

# શ્રીલક્ષ્મીસૂક્ત

## Document Information

Text title : lakShmIsUkta

File name : laxmiisuukta.itx

Category : sUkta, devii, lakShmI, svara, devI

Location : doc_devii

Author : Traditional

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : September 11, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીલક્ષ્મીસૂક્ત

શ્રી ગણેશાય નમઃ ।
ૐ પદ્માનને પદ્મિનિ પદ્મપત્રે પદ્મપ્રિયે પદ્મદલાયતાક્ષિ ।
વિશ્વપ્રિયે વિશ્વમનોऽનુકૂલે ત્વત્પાદપદ્મં મયિ સન્નિધત્સ્વ ॥

પદ્માનને પદ્મઊરુ પદ્માશ્રી પદ્મસમ્ભવે ।
તન્મે ભજસિં પદ્માક્ષિ યેન સૌખ્યં લભામ્યહમ્ ॥

અશ્વદાયૈ ગોદાયૈ ધનદાયૈ મહાધને ।
ધનં મે જુષતાં દેવિ સર્વકામાંશ્ચ દેહિ મે ॥

પુત્રપૌત્રં ધનં ધાન્યં હસ્ત્યશ્વાદિગવેરથમ્ ।
પ્રજાનાં ભવસિ માતા આયુષ્મન્તં કરોતુ મે ॥

ધનમગ્નિર્ધનં વાયુર્ધનં સૂર્યોધનં વસુઃ ।
ધનમિન્દ્રો બૃહસ્પતિર્વરુણો ધનમસ્તુ મે ॥

વૈનતેય સોમં પિબ સોમં પિબતુ વૃત્રહા ।
સોમં ધનસ્ય સોમિનો મહ્યં દદાતુ સોમિનઃ ॥

ન ક્રોધો ન ચ માત્સર્યં ન લોભો નાશુભા મતિઃ ।
ભવન્તિ કૃતપુણ્યાનાં ભક્તાનાં શ્રીસૂક્તં જાપિનામ્ ॥

સરસિજનિલયે સરોજહસ્તે ધવલતરાંશુક ગન્ધમાલ્યશોભે ।
ભગવતિ હરિવલ્લભે મનોજ્ઞે ત્રિભુવનભૂતિકરિ પ્રસીદ મહ્યમ્ ॥

શ્રીર્વર્ચસ્વમાયુષ્યમારોગ્યમાવિધાચ્છોભમાનં મહીયતે ।
ધાન્ય ધનં પશું બહુપુત્રલાભં શતસંવત્સરં દીર્ઘમાયુઃ ॥

ૐ મહાદેવ્યૈ ચ વિદ્મહે વિષ્ણુપત્ન્યૈ ચ ધીમહિ ।
તન્નો લક્ષ્મીઃ પ્રચોદયાત્ ॥

ૐ મહાલક્ષ્મ્યૈ ચ વિદ્મહે મહશ્રિયૈ ચ ધીમહિ ।

તન્નઃ શ્રીઃ પ્રચોદયાત્ ॥

વિષ્ણુપત્નીં ક્ષમાં દેવીં માધવીં માધવપ્રિયામ્ ।
લક્ષ્મીં પ્રિયસખીં દેવીં નમામ્યચ્યુતવલ્લભામ્ ॥

ચન્દ્રપ્રભાં લક્ષ્મીમૈશાનીં સૂર્યાભાંલક્ષ્મીમૈશ્વરીમ્ ।
ચન્દ્ર સૂર્યાગ્નિસઙ્કાશાં શ્રિયં દેવીમુપાસ્મહે ॥

॥ ઇતિ શ્રીલક્ષ્મી સૂક્તં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*shrI lakShmIsUkta*
pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*